International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 242-245
© 2021 IJSR
www.anantaajournal.com
Received: 05-11-2020
Accepted: 13-12-2020

**PS Angad**
Research Scholar, National Sanskrit University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**PS Angad**
Research Scholar, National Sanskrit University, Tirupati, Andhra Pradesh, India

# ज्योतिश्शास्त्रे विवाहनिरूपणम्

**PS Angad**

षोडशसंस्कारेषु अन्यतमोऽयं संस्कारः विवाहसंस्कारः अतीवमहत्त्वपूर्णः एव । 'अयज्ञियो वा एव यो अपत्नीकः'[1] इति वेदोक्तमन्त्रादधिगम्यते यत् अपत्नीकः यज्ञाधिकारी न भवतीति, यज्ञश्च स्वर्गफलदायकः । तस्मात् यज्ञादिकर्मसु अधिकारार्थं विवाहसंस्कारः निर्दिष्टः । मनुनाप्युक्तं –

चतुर्थमायुषो भागं वसित्वाद्यं गुरौ द्विजः ।
द्वितीयामायुषो भागं कृतदारो गृहे वसेत् ॥[2]
वनेषु च विहत्यैवं तृतीयं भागमायुषः ।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत् ॥[3]

ब्रम्हचर्यम्, गृहस्थं, वानप्रस्थं, संन्यासः इति चतुर्णामश्रमाणामपि प्राधान्यं मनुरवबोधयति । तत्रगृस्थाश्रमस्य तदंशगतत्वात् प्राधान्यता अपि वर्तत एव । सत्प्रजाभिवृद्ध्या पितृऋणान्मुक्तः स्यात् इति हेतोरपि विवाहसंस्कारः अत्यन्तं आदरेण वैदिकोक्तकर्मणा आचर्यते । तदुक्तं तैत्तिरीयसंहितायां –

जायमानो ह वै ब्राम्हणस्तिभिः ऋणैः ऋणवाञ्जायते ।
ब्रम्हचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः ॥[4]

विधिपूर्वकक्रियमाणोऽयं संस्कारः परिणयः, उद्वाहः, पाणिपीडनम्, उपयमः, परिग्रहः, पाणिग्रहणं, वरणम्, दापकर्म इत्यदिशब्दैः व्यवह्रियन्ते । तदुक्तम् अमरकोशे –

परिविततिस्तु तज्जायान्विताद्योपयमौ समौ ।
तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ॥[5]

'वि' उपसर्गपूर्वकात् 'वह प्रापणे' इति धातोः घञ् प्रत्यये विहिते विशिष्टं वहनमिति अर्थपूर्वकोऽयं विवाहः इति शब्दः निष्पन्नः ।

अमुष्मादयं शब्दः दम्पतीभ्यां कौटम्बिकानां सामाजिकानां वैय्यक्तिकानाञ्च दायित्वं वहनम् इत्यर्थं द्योतयति । यावत्पर्यन्तम् अपत्यानि समर्थरूपेण स्वजीवनं निर्वोढुम् अर्हाणि भवन्ति तावत्पर्यन्तं तेषां सम्बद्धदायित्वस्य वहनमिति विशिष्टोऽर्थो ध्वन्यते । द्वयोः व्यक्तयोः एकजीवनतया गमनत्वाद् अस्य संस्कारस्य वैशिष्ट्यम् अन्येभ्यः संस्कारेभ्यः अत्यधिकमेव । अतः तयोः दम्पत्योः आनुकूल्यं शास्त्रकारैः विदितमेव ।

तच्चोक्तं याज्ञवल्क्येन –

"यत्रानुकूलं दम्पत्योस्त्रिवर्गस्तजत्र वर्द्धते"

**अपि चोक्तं पाणिग्रहणस्य महत्त्वं बृहस्पतेः मतानुसाम् –**

विवाहादेव सत्सृष्टिः सत्सष्ट्यैव जगत्त्रयम् ।
चतुर्वर्गफलावाप्तिस्तस्मात्परिणयः शुभः ।।
विवाहसमये काले सुखासीनं शुभं प्रियम् ।
दैवज्ञं भक्तितो नत्वा सम्पूज्यादौ यथबलम् ।।[6]

**एवं विचारं मनसिकृत्यैवाचार्येण रामदैवज्ञेनोक्तम् –**

भार्या विवर्गकरणं शुभशीलयुक्ता
शीलं शुभं भवति लग्नवशेन तस्याः ।
तस्माद्विवाहसमयः परिचिन्त्यते हि
तन्निघ्नतामुपगताः सुतशीलधर्माः ।।[7]

अस्मात् श्लोकात् स्पष्टम् अधिगम्यते यत् विवाहसमयस्य सुलग्नवशादेव भार्यायाः स्वभावो भर्तुः अनुकूलतया भवति यस्माच्च धर्मार्थकामरूपस्य करणञ्च तत्र विचार्यत इति । अत एव विवाहसंस्कारः निर्दिष्टमुहूर्त्तानुसृतकाले एव आचर्यते । जन्मकालीनग्रहाणां स्थित्यनुरोधेन अरिष्टादिदोषाः स्युः, तेषां दोषाणां परिहारार्थम् अरिष्टनाशार्थं अस्य संस्कारस्य शुभफलसिद्ध्यर्थञ्च ज्योतिश्शास्त्रोक्तक्रमेण शुभसमये एवायं संस्कारः आचरणीयः ।

षडङ्गात्मके ज्योतिश्शास्त्रे तावत् मुहूर्त्तविभागे संस्काराणां सुष्ठुकालनिर्णयार्थं विवाहसम्बन्धविचाराः प्रतिपादिताः । अत एव मुहूर्त्तचिन्तामणिः, विद्यामाधवीयम्, मुहूर्त्तपदवी, मुहूर्त्तरत्नाकरः, मुहूर्त्ततत्वम्. मुहूर्त्तमार्तण्डः इत्यादिषु अनेकेषु विवाहसंस्कारार्थयुज्यमानः मुहूर्त्तः विचारितः । होरास्कन्धे तु नित्यजीवने अनुभूयमानयोगानां निरूपणात् वैवाहिकजीवनोपकृतयोगाः अपि लक्ष्यन्ते । एवं प्रश्नविभागे तावत् विवाहप्रश्नावसरे विवाहकालनिर्णयविचारः, वरवध्वोः आनुकूल्यपरीक्षणविचारः इत्याद्यनेके विवाहसम्बद्धविषयाः चर्चिताः इति ज्योतिश्शास्त्रे विवाहनिरूपणप्रकारः ।

**विवाहे नवग्रहाणां कारकत्वम्**

अस्य शास्त्रस्येदमेव महत्वं यत् प्रत्यक्षतया दृश्यमानानां ग्रहाणां स्थितिगत्यनुकूलतया प्रभावितानि फलानि अनुमातुं शक्यन्ते । सर्वेषामपि ग्रहाणां प्रभावः तत्तद्ग्रहसम्बन्धितविषयेषु तद्भावानुरोधेन बलाबलत्वप्रकारेण च आलोच्यते । केषां ग्रहाणां केषु केषु भावेषु केन प्रकारेण कथङ्क्रमेण प्रभावः स्यादित्यत्र शास्त्रमेव प्रमाणम् । अत एवेदं श्रूयते-

अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलं ।
प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।[8]

राशिचक्रस्थराशीनां द्वादशसङ्ख्यायुक्तानां भावत्वेन कल्पिते प्रत्येकं भावेन आलोच्यमानाः विचाराः अनेके सन्ति । दिग्देशकालानुरोधेन तत्तत्सम्बन्धितः सर्वोऽपि विषयः लग्नात् द्वादशभावेषु अधिष्ठितः स्यात् । तस्माद् एतैः भावैः विविधविधविषयाः ज्योतिर्विद्भिरवगम्यन्ते । एषु भावेषु स्थितानां ग्रहाणां बलाबलनुरोधेन तत्तद्भावसम्बन्धितविषयाणां गभीरता परिमाणयितुमपि शक्या । अत एव जातकेषु ग्रहाणां अनुकूलभावेषु स्थित्या शुभफलं, तद्विपरीततया स्थित्या अशुभं फलम् । सहजतया वैवाहिकजीवनन्तु सप्तमभावेन चिन्त्यते चेदपि तेन भावेन सह सम्बन्धिताः अन्ये भावाः अपि सन्तीति हेतोः अन्येषां भावानामपि चिन्तनं कार्यम् । यथा वैवाहिकजीवने सुखस्वास्थ्यसत्प्रजोत्पत्तिः, बन्धुजनाः, धनलाभादिसम्पत्समृद्धिः इत्याद्यनेके विषयाः सम्बन्धिताः एव । अतः सर्वेषामपि भावानाम् एकस्मिन् भावे साक्षात् वा परोक्षतया सम्बन्धः स्यात् । यथा हि लग्न-चतुर्थ-सप्तम-अष्टम-द्वादशभावाः क्रमशः स्वास्थ्यं सुखं दाम्पत्यम् आयुः व्ययः इत्यादीनां कारकाः । अतः एषु भावेषु शुभग्रहाणां स्थित्या शुभं फलं स्यात् । एवं पापखेचराणां स्थित्या तदनुरोधेन फलचिन्तनङ्कुर्यात् । तथापि सर्वेषां ग्रहाणां तेषु तेषु भावेषु स्थित्या शुभस्य शुभम् अशुभस्य अशुभमिति केवलं न यतो हि शत्रुमित्रक्षेत्रभेदेन उच्चनीचबलेन अथवा दीप्ताद्यवस्थाभिश्च शुभाशुभत्वफलविचारे भेदोऽनुमातव्यः । विवाहसम्बन्धविचाराणां स्पष्टप्रतिपत्तये तत्कारकग्रहाणां बलाबलविचार एवात्यन्तापेक्षितः । कस्यचिज्जीवने विवाहसम्भवः कदा इति निर्णयस्तु एतैरंशैः क्रियते–

- सप्तमभावः
- सप्तमभावाधीशः तथा तस्य स्थितिः
- सप्तमभावात् पञ्चमराशिः
- सप्तमात्सप्तमभावः।

- सप्तमभावात् नवमराशिः
- सप्तमभावाधिपस्य नवांशकाधिपः
- तस्मात् पञ्चमसप्तमनवमराशिः
- शुक्रः, लग्नाधिपः, चन्द्रलग्नाधिपः, सप्तमभावाधिपः

एषां गोचरवशात् स्थितिः तथा सप्तमभावाधीशस्य राशिः नवांशकराशिः तयोः त्रिकोणराशौ गुरोः स्थितिकाले च विवाहसम्भवः स्यादिति निगदितं प्रश्नमार्गे –

जामित्रे तदधीश्वरांशगृहयोर्यद्वानयोस्सप्तमे
धर्मे वाऽथ सुते चरन्ति भृगुभूलग्नास्तजन्मेश्वराः ।
काले यत्र चरेद्यदा च धिषणो द्यूनेशभांषर्क्षयोः
यद्वा तत्सुतधर्मयोः स समयः प्रोद्वाहदायी नृणाम् ।।[9]

एतस्माज्ज्ञायते यत् वैवाहिककालनिर्णये कारकाः ग्रहाः शुक्रचन्द्रगुरवो भवन्ति इति । सामान्यतया ज्योतिश्शास्त्रे देशाभेदतया ऐक्यस्वरेण स्वीक्रियमाणोऽयं विवाहकारको ग्रहः शुक्रः । शुक्रस्य बलाबलानुसारेण दाम्पत्यजीवनं कथङ्क्रमेण स्यादिति चिन्त्यते ।
तथा च शुक्रेण चिन्त्यमानाः केचनांशाः सप्रमाणं निरूप्यन्ते –

सद्युते नवमे शुक्रात्तदीये च बलान्विते ।
धर्मशीला भवेत् भार्या सत्पुत्रा भाग्यावत्यपि ।।[10]

शुक्रात् नवमभावे शुभग्रहयोगः, तदधिपस्य प्रबलत्वे च पत्नी भाग्यवती धर्मशीलान्विता सत्पुत्रवती भवेदिति ज्योतिर्विदो वदन्ति । शुक्रवशात् वैवाहिकचिन्तनसमर्थनायैव अपरमपि प्रमाणं दृश्यते –

द्यूने बलेद्रिक्तशुभेशमित्रप्राप्तेक्षिते द्यूनपतौ सिते वा ।
सद्वर्गसंस्थे सबले च भार्या भवन्ति तत्खेटगुणानुरूपाः ।।[11]

**प्रमाणान्तरञ्च-**

त्रिसप्तमायपञ्चमारिभावगो निशाकरो
रविज्ञजीववीक्षितो विवाहकारको भवेत् ।
त्रिकोणकेन्द्रगागुरुज्ञशुक्रशीतभानवो
यदीह लग्नतो भवन्ति वा विवाहकारकाः ।।[12]

यदि चन्द्रः तृतीय-सप्तम-एकादश-पञ्चम-षष्ठभावेषु एकत्र भुत्वा रविणा बुधेन गुरुणा दृष्टः तर्हि विवाहकारको भवति । अथवा गुरुः बुधः शुक्रः शशिः रविः लग्नात् त्रिकोणे वा केन्द्रे स्थितस्तर्ह्यपि विवाहकारकत्वं चिन्त्यते ।

**विवाहोपकृतयोगाः**
साक्षात्तु विवाहयोगः इति ज्योतिश्शास्त्रे न क्वापि प्रसिद्धिः, अथापि वैवाहिकजीवने साधनत्वेन विषयीभूताः केषाञ्चन अंशभूतानां चिन्तनेन विवाहसम्भवविचाराः अवगम्यन्ते ।

पूर्वमायुः परीक्ष्येत पश्चाल्लक्षणमादिशेत् ।
इत्युक्त्यायुः परीक्ष्याथ लक्षणं किञ्चिदुच्यते ।।[13]

इति वचनेन आदावेव वरकन्ययोः जातकावलोकनेन आयुषः परीक्षणं कार्यम् । तथैव उभयोरपि जातके सन्ततिः, विद्या, सम्पत्, सुखं, आरोग्यम्, कर्मजीवः, स्वभावः इत्यादिसम्बन्धविचाराः वीक्षणीयाः । तदुक्तम् –

कन्यायाः पुरुषस्य च प्रथमतो निर्णीय चायुः पुनः
सन्ततादि तथेतराञ्च सकलं दैवज्ञवर्यस्ततः ।
भाविप्रश्नविलग्नतोऽपि निखिलं पाणिग्रहं कारयेत्
सन्तानाय यतः प्रयाति नितरां प्रीतिं पितृणां गणः ।।[14]

आदौ दैवज्ञेन हि जातकवशात् कन्यापुरुषयोः आयुर्निर्णयः कर्तव्यः । ततश्च सन्ततिः, सम्पत् इत्यादिविषयानधिकृत्य निश्चयो भवेत् । तथैव विवाहप्रश्ने कृते आरूढवशात् भाविकालीनगुणदोषान् सुपरीक्ष्य तयोः वरकन्ययोः विवाहनिर्णयः क्रियते । अस्मात् सत्प्रजोत्पत्त्या वंशपरिपालनेन पूर्वजानां पितृणां सन्तृप्तिर्जायते । इत्येवं विवाहार्थमुपकृताः योगाः इमे भवन्ति –
आयुर्योगः, राजयोगः, सन्ततियोगः, सुदारासम्पन्नयोगः, स्वास्थ्यसम्बन्धयोगाः, इत्येते अनुकूलयोगाः परीक्ष्यन्ते । तद्विहाय प्रतिकूलात्मकयोगाः अपि केचन विद्यन्ते यो च विवाहं बाधन्ते यथा प्रव्रज्यायोगः, वैध्वययोगः, विषकन्यायोगः, कुलटायोगः, अपुत्रयोगः, क्लीबयोगः इत्यादयः ।

**उपसंहारः**
दम्पत्योः परस्परसहयोगेन प्रीतिपूर्वकजीवनोद्देश्येन जातकपरीक्षणङ्कार्यते । तदुद्देश्येन जातकावलोकनेन पुरुषजातके सप्तमभावानुरोधेन कलत्रचिन्तनं, स्त्रीजातके तु सप्तमभावानुरोधेन भर्तृचिन्तनम्, अष्टमभावेन पतिसौभाग्यचिन्तनञ्च क्रियते । सप्तमभावः, अष्टमभावः इति उक्ते सामान्यतया लग्नादेव चिन्त्यते, अथापि विशेषतया फलदीपिका, प्रश्नमार्गः इत्यादिषु ग्रन्थेषु उक्तप्रकारेण तु चन्द्रात् शुक्रादपि सप्तमाष्टमभावाः अवलोक्यन्ते, तेन अनेके योगाः कल्प्यन्ते च । लक्षशः

ज्योतिषग्रन्थानां सत्वात् योगानम् अनन्ततायाश्च न सर्वे ग्रन्थाः अवलोकयितुं शक्याः, न हि सर्वे ग्रन्थाः उपलभ्यन्ते च । मुहूर्त्तग्रन्थेषु, होराग्रन्थेषु, प्रश्नग्रन्थेषु च विवाहसम्बद्धविचाराः बहुधा विचारिताः इत्यतः त्रिस्कन्धात्मके ज्योतिश्शास्त्रे विवाहसंस्कारनिरूपणं कृतम् ।

## सहायग्रन्थसूची


1. ग्रन्थः — ग्रन्थकर्ता – प्रकाशकः - वर्षम्
2. मुहूर्त्तचिन्तामणिः — श्रीरामदैवज्ञविरचिता पीयूषधाराव्याख्यासहिता - चौखम्बा संस्कृत संस्थान्, वाराणसी - 2006
3. मुहूर्त्तपदवी — ए वेलुपिल्ला - द देवी बुक्स् कोडुङ्गलूर् - 2009
4. प्रश्नमार्गः — इटवकाट् नम्पूतिरिः, कृष्णालयं पब्लिकेशन्स्, कोच्चि -2010 व्याख्याकारः पुन्नश्शेरि नीलकण्ठ शर्मा – देवी बुक्स् कोडुङ्गलूर् -2004
5. बृहज्जातकम् — श्रीवराहमिहिरविरचितम् भट्टोत्पलटीकासहिता - चौखम्बा संस्कृत संस्थान्, वाराणसी - 2013
6. लघुजातकम् — वराहमिहिरप्रणीतम् - चौखम्बा संस्कृत संस्थान्, वाराणसी - 2006
7. मनुस्मृतिः — डा. प्रवीण प्रलयङ्कर – न्यू भारतीय बुक् कार्परेशन्, दिल्ली – 2004
8. मुहूर्त्तकल्पद्रुमः — श्रीमद् विदुलदीक्षित विरचितः – रंज्जन् प्रकाशन् अन्सारी रोट्, दरियागञ्ज, नवदिल्ली -
9. तैत्तिरीयसंहिता — श्रीनृसिंहप्रिया ट्रस्ट् चेन्नै, 1925
10. अमरकोषः — अमरसिंहः – निर्याणसागरप्रेस् बंबई - 1895
11. बृहद्दैवज्ञरञ्जनम् — मुरलीधर चतुर्वेदी - मोत्तिलाल् बनारसीदास्, वाराणसी - 2015
12. मुहूर्त्तदीपकः — दैवज्ञ श्री महादेव भट्टः- चौखम्बा संस्कृत संस्थान्, वाराणसी - 2006
13. विद्यामाधवीयम् — श्रीविद्यामाधवः – ओरियेन्टल् लायिब्ररि पब्लिकेशन्स् मैसूर् - 1923
14. मुहूर्त्तमार्तण्डः — श्रीनारायणदैवज्ञविरचितः – चौखम्बा संस्कृत संस्थान्, वाराणसी – 2005
15. वेदाङ्गज्योतिषम् — लगधमुनिः – चौखम्बा विद्याभवन् वाराणसी
16. जातकादेशः — व्याख्याता काणिपय्यूर् शङ्करन् नम्पूतिरिपाट्, पञ्चाङ्गपुस्तकशाला कुन्नङ्कुलम् – 2013
17. प्रश्नभूषणम् — दैवज्ञश्रीजीवनाथविरचितम् - चौखम्बा संस्कृत संस्थान्, वाराणसी - 1988